**International Journal of Research in Social Sciences**
Vol. 9 Issue 3, March 2019,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# शुक्रनीतौ राजधर्मविवेचनम्

**सन्नी शर्मा, शोधच्छात्रः,**
साहित्यविभागः, बलाहरपरिसरः,
केन्द्रीय-संस्कृत-विश्वविद्यालयः, कांगडा

**शोधसारः ( Abstract)-**

चेत् ननुजानां व्यक्तिगत-सामाजिकजीवनञ्च विषये महत्वपूर्णाम्प्रश्नानां विषये गाम्भीर्येण विचारणीयः तदा नीतिशास्त्रस्य स्वरुपं क्षेत्रञ्च किमिति ज्ञानं सारल्येन भविष्यति। स्वस्य दैनिक जीवने शुभाशुभे, उचितानुचिते, कर्तव्याकर्तव्ये, सौभाग्यम्, दौर्भाग्यम्, आदीनां वा तु कस्यचित् व्यक्तेः चरित्र सम्यकं असम्यकं इति निर्धारणं किं करणीयम् किं न करणीयम् इत्यादि वाक्येषु कःनिर्णयः इति प्रमाणसरितं कारणसहितं तर्कसङ्गतं च प्रस्तोतुं शक्यते ? किं मनुष्याः कर्म कर्तुं स्वतन्त्राः सन्ति ? तदा किं कर्माकर्म णि इति निर्णयं कः कुर्यात् ? वयं मनुष्याः अस्माकं के कर्तव्याः इति निर्णयः कः कुर्यात् ? किं समस्तकर्मणामुद्देश्यं स्वस्य सुखं हितमेव अथवा परेषां हितार्थाय सुखायै सर्वं करणीयम् ? चेत स्वस्य परेषाञ्च हितानां विषये एव सन्तुलनं स्थापनीयं तर्हि तत्र कः उपायः ?

यदा व्यक्तेः समाजस्य च हितानां मध्ये सघर्षः जायते तु तत्र केन विधिना तद् समापनीय किं मानवजीवनस्य परं लक्ष्यं अथवा अन्तिम साध्मस्ति ? चेत अस्ति तर्हि किं कथञ्च प्राप्तव्यम् ? किं सर्वान् विहाय मनुष्य स्व लक्ष्यं प्राप्तिः कर्तव्या ? मानवजीवनस्य एतादृशानामाधारभूतप्रश्नानां उपरि नीतिशास्त्रं व्य वस्थितरुपेण विचारं करोति तथा च समुचितं सन्तोषप्रदं तर्कसङ्गतम् च उत्तरं कर्तुं प्रयतते।

**नीतिशास्त्रस्योद्भमः –**

नीतिशास्त्रस्य इतिहासविषये चिन्तनं कुर्मः चेत् ज्ञायते मनुष्यस्य सामाजिकजीवनेनैव अस्य जन्मः अभूत् यदा मनुजैः समाजः निर्मितः समाजे च विविधाः समस्याः उत्पन्नाः तदा समस्यानां निराकरणे नियमानाम् आवश्यकता अनुभूता या तस्य एवञ्च परेषां इच्छारुचि-

**International Journal of Research in Social Sciences**
Vol. 9 Issue 3, March 2019,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

आकाक्षोद्दश्यस्वार्थादिषु यः संघर्षः भवति तद् समाप्तं यस्य पालनं कुर्वन् मनुष्यः अन्यैः सह सखुपूर्वक सामञ्जस्यपूर्ण सामाजिकं जीवनं जीवेत् ।

**प्राचीनभारतीयं नैतिकचिन्तनम्**

वेदं, ब्राह्मणग्रन्थं, उपनिषद्, धर्मसूत्रं, रामायणं, महाभारतं, पुराणेत्यादयः अस्य युगस्य महत्वपूर्णाः ग्रन्थास्सन्ति। वेदं भारतीयनीतिशास्त्रस्य प्राचीनतमं ग्रन्थमस्ति। वैदिकयुगजीवनस्योद्देश्यं सुखमैश्वर्यञ्चासीत्। अस्मिन् युगे जीवनं पूर्णरूपेण ग्रहणकरणस्य प्रवृत्तिरासीत्। जनेषु राष्ट्रीयभावनाप्यासीत् राष्ट्रञ्च सुखीसम्पन्नं तथा शत्रुषु विजयी द्रष्टुमिच्छन्ति स्म। इदं समस्तप्रकारस्य लौकिकानां पारलौकिकानाञ्च सुखानां प्राप्तये विभिन्नदेवतानां पूजा, प्रार्थना, यज्ञादिकर्मान् अनुतिष्ठन्ति स्म। अस्य युगस्य विशेषतास्ति यत् मरणस्य पश्चात् स्वर्गस्य प्राप्तिः तथामरत्वस्य कामना, अस्य प्रमुखसाधनं यज्ञादि कर्म। एषः युगः प्रार्थनाप्रधानः आसीत्। वेदानां पश्चात् ब्राह्मणग्रन्थानां प्रचलनमभवत्। अस्मिन् काले जनानां जीवनस्यादर्शमपि प्रायः तदेवासीत् यः वेदानां समये आसीत्। अन्तरमेतावदेव यत् यत्र वेदानां समये प्रार्थना तथोपासना मुख्यासीत्, तत्र ब्राह्मणयुगे यज्ञानां विधानं प्रचलितमासीत्। अस्मिन् समये वर्णव्यवस्थापि प्रचलितासीत् दमनस्य, दयायाः, दानस्य च महत्वमपि अवर्धत।

उपनिषदां युगे लौकिकसुखैः विरक्तं भूत्वा आत्मचिन्तनस्य व परमतत्वस्य प्राप्तौ अधिकं बलमददन्। इदं चिन्तनमभवत् यत् परमतत्वस्य ज्ञानेन यदानन्दं लभते, तद् बहिर्विषयभोगान्नसंभवम्। इदं यत् यान् साधनेन ब्रह्मणः अनुभवं भवति ते संसारस्य सर्वसम्पत्तीन् अस्य तुलनायां तुच्छं गणयन्ति। वैदिकयुगरयोपासनायाः अस्मिन् युगे अवहेलना कृता तथा संसारसागरं तर्तुं यज्ञादेः तुलना असुरक्षितनौकया कृता। चत्वारः पुरुषार्थाः धर्मार्थकाममोक्षञ्च आदर्शजीवनस्य प्रमुखाङ्गानि मतानि।

धर्मसूत्राणां, धर्मशास्त्राणां, स्मृतीनाञ्च प्रचलनं उपनिषद्कालस्य पश्चादभवत्। सामाजिकव्यवस्थां सुदृढीकर्तुं वर्णाश्रमव्यवस्थायाः अनुसारं कर्मकरणे विशेषबलं प्रदत्तम्। तस्य समयस्य भारतीयजीवनं नैतिकनियमैः बद्धमासीत्। धर्मज्ञानस्य महापुरुषाणां उपदेशानामाचरणानाञ्च प्रचारमपि साधारणजनतायां क्रियते स्म। धर्मपालनाय प्राणानां त्यागमपि श्रेयस्करं अमन्यत। धर्मविपरीताचरणकर्तुः निन्दा क्रियते स्म।

**International Journal of Research in Social Sciences**
Vol. 9 Issue 3, March 2019,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

रामायणं महाभारतञ्च भारतस्य द्वे प्राचीनेतिहासग्रन्थे स्तः। एतेषां प्रमुखविषयं धर्मं नैतिकशिक्षा तथा राजनीतिः वर्तते। ग्रन्थेष्वेतेषु धर्माधर्मस्य नीत्यनीतेः मार्गे चलतां शुभाशुभान् परिणामान् अदर्शयन्।

**संस्कृतसाहित्यस्य नीतितत्त्वदृष्ट्या संक्षिप्तपरिचयः --**

संस्कृतसाहित्ये व्यवहारनीतिः ,व्यवहारः लगनता, आदर्शवादिता भारतीय संस्कृतिः च वर्तते अनया एव विशेषतया साहित्यमिदं विदेशेषु अपि लोकप्रियमस्ति संस्कृतसाहित्यं नीतिकथाभिः परिपूर्णः वर्तते । पञ्चतन्त्र , हितोपदेशादि उदाहरणं अस्माकं समक्षमेव । संस्कृत साहित्ये नीतिकथानां वर्णनं मानवसभ्यतायाः सदृशमेव प्राचीनं अस्ति वैदिक साहित्यारभ्यः जनः जातकमाला, पञ्चतन्त्रम् , महाभारतम् , रामायणम् , हितोपदेशादि ग्रन्थाः नीतिकथानां नीतितत्त्वानां च अमूल्यस्त्रोतानि सन्ति ।येषां प्रेरणया मानवजीवनाचारव्यवहारादिनां शिक्षा गृह्यते । शब्दकल्पद्रुमे वर्णीतमस्ति यत् -- ,, नीयन्ते संलभ्यन्ते उपादय एहिककाभुष्मि कार्यावास्यामनया वा नी अधिकरणे , करणे वाकिना अर्थात समाजं सन्तुलित मार्गे अग्रसर करणार्थं धर्म , अर्थ, काम , मोक्षश्च प्राप्तिः यैः विधिभिः व्यवहारिक,सामाजिक,आचारिक, धार्मिक, राजनैतिकादि नियमानां विधानं देशकालस्थानपात्रादि सन्दर्भे क्रियते तत् सर्वे नीति पदे अभिहितं भवति। संसारेऽस्मिन् पुरूषार्थचतुष्ट्यमित्यतस्य प्राधान्यमस्ति इत्यस्य धर्मार्थ साधनमस्ति काममोक्षश्च साध्यम् । मोक्षमेव अन्तिमं साध्यम् अस्ति ।व्यक्तिगत स्वार्थ प्रदर्शनं च विहाय कर्त्तव्यस्य पालनं नीतिपूर्वकं कुर्वनैव मनुष्यः एव साध्यं प्राप्तुं शक्नोति । धर्मः , आचारः एवञ्च कर्त्तव्यशब्दोऽपि नीति, शब्दस्य अर्थं स्पष्टतया व्यापकता च प्रदानं करोति । धर्म शब्दः संस्कृतस्य धृञ् – धृ धारणे धातुनां व्युत्पद्यते धर्मस्य व्यावहारिकं रूपमेव नीतिः एवञ्च नीतेः व्यवहारिकं रूपम् विधिः अस्ति । आधुनिक दृष्ट्या वक्तुं शक्यते यत् नीतिशीस्त्रं धर्मशास्त्रं ,आचारशास्त्रं एव जीवनस्य विज्ञानं अस्ति यः अस्मान् जीवनं निर्माणस्योचितमार्गं प्रदर्शयति । वैदिक साहित्ये नीतिः शब्दस्य कृते ,ऋत, शब्दस्य प्रयोगः कृतः यस्यार्थः अस्ति नियमः अथवा सुखव्यवस्था। वैदिकसाहित्ये नीतिशास्त्रस्य बहवः सिद्धान्ताः वर्णिताः सन्ति । कामन्दकीयशास्त्रे आचार्य कामन्दकेन दण्डनीतेः लक्षणं— नयनान्नीतिरूच्यते इत्युक्तम्। आचार्यशुक्रेन नीतिशास्त्रस्य परिभाषा उक्ता यत्-

**International Journal of Research in Social Sciences**
Vol. 9 Issue 3, March 2019,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**सर्वोपजीवकं लोकोस्थिति कृन्नीतिशास्त्रकम्।**

**धर्मार्थकाममूलं हि स्मृतं मोक्षप्रदं यतः ।।**[1]

अर्थात् नीतिशास्त्रं सर्वेषां जीविकायाः साधनं लोकस्य स्थितेः कारणभूतम एवञ्च धमर्थिकामस्य मूलकारणेन मोक्षदायकः अस्ति । नैतिकाचरणं प्राणिमात्रस्य सम्पूर्णदोषानां अपूर्णतानाञ्च तथैव निराकरमङ्करोति यथा प्रकाशः तमसः । ब्रह्ममीमासायां ब्रह्मज्ञानाय सैव अधिकारी भवति यः साधनचतुष्ट्यसम्पन्न स्यात् साधनचतुष्ट्ये नैकानेकगुणविवेकवैराग्यषट्सम्पत्ति ( शमदमतितिपरतिश्रद्धासमाधानं) ममुक्षायाः च समावेशः अस्ति । सद्ज्ञानी अपि सैव यः स्व ज्ञानानुरूप जीवनस्य च निर्माणकुर्यात् । नैतिकजगति संस्कृतसाहित्य अपूर्वं योगदानं वर्तते इत्यत्य अस्मातं ऋषिभिः उग्रसाधनया ऋतम्भराप्रज्ञया ध्यानेन च प्राप्तचेतन या एवञ्च अनुभवेन नीतेः अनेक मौलिक तत्त्वानां साक्षात्कारः कृतः ।

**राजा शब्दस्य निष्पत्तिः , राज्ञः स्वरूपं प्रकृतिः कर्तव्यानि च**

राजेति शब्द ,राज लृ दीप्तौ, इति धातुनां निष्पन्नो भवति । महर्षि मनुनाऽपि स्व ग्रन्थे उल्लिखितम् यत् –

**तपत्पादित्यवत्यवच्चैष चक्षूंषि च मनांसि च**

**न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ।।** [2]

महाभारते रञ्च् धातुना राजा शब्दस्य निष्पत्तिः स्वीक्रियते- रञ्जिताश्च प्रजाःसर्वास्तेन राजेति शब्द्यते।।[3] कालिदासेन उक्तमस्ति यत्— राजा प्रकृति -रञ्जनात् ।।[4]

राजा आचारस्य प्रेरको भवति [5] । राजदण्डभयादेव लोकाः धर्मपालने रताः जायन्ते इति अत्र सन्निरूपितं विद्यते ।[6] राजा सत्वरजःतमोगुणैः भेदैः त्रिविधोऽपि भवति। सात्विकराजा स्वधर्मणि निरतः, यज्ञेषु संलग्नः, शत्रुसमूहस्य जेता, दना-दयावीरः विषयेषु निस्पृहः च भवति। [7] एतै गुणैर्विपरीतः तामसगुणोपेतः भवति। सः अन्ते नरकं याति। [8] यः राजा दम्भी, लोभी, विषयी वंचकश्च भवति सः राजस् गुणोपेतः इति विज्ञातव्यम्। सः राजस् गुणोपेतः राजा अधम् इति संज्ञया संज्ञितो भवति। [9] राजा गुरोः, मातुः, पितुः भ्रातादीनां सप्तजनानां गुणैः अन्वित एव राजपदं लभते। अन्यथा राजपदप्रतिष्ठितो ऽपि न लोकैः मान्यः भवति यथा- "पिता माता गुरुर्भ्राता बन्धुर्वैश्रवणो यमः। नित्यं सप्तगुणैरेषां युक्तो राज न चान्यथा।"[10]

**आपत्काले राज्ञः धर्मस्य निर्देशः**

**सर्वानापदि सदसि समाहूय बुधान् गुरुन्**
**भ्रातृन् बन्धूंश्च भृत्यांश्च ज्ञातीन् सभ्यान् पृथक् पृथक् ।**
**यथार्हं पूज्य विनतः स्वाभीष्टं याचयेन्नृपः।**
**आपदं प्रतरिष्यामो यूयं युक्त्या वदिष्यथ ।**
**भवन्तो मम मित्राणि भवत्सु नास्ति भृत्यता ।।**[11]
**वृतिं विना स्वामिकार्यं भृत्यः कुर्यात् समाष्टकम्**
**षोडशाब्दं धनी यः स्यादितरोऽर्थानुरूपतः ।।**[12]

यद्यपि राज्ञः धर्म राजकर्तव्यवर्णनोपक्रमे सुविस्तृतं विज्ञापितं वर्तते तथापि आय-व्ययवर्णनोपक्रमे शुक्रनीतौ राज्ञः व्यवहारविषये उक्तमस्ति यत् यस्मिन्स्थाने यस्मिन्द देशे यादृक् व्यवहारः तद्देशीयैः क्रीयते तथैव तत्र तादृग्वयवहारः कर्तव्यः।

यत्र यादृग् व्यवहारस्तत्र तादृक्प्रकल्पयेत् ।।[13]

**राज्ञः कर्तव्यानि –**

राजा देशस्य नायकः भवति तस्य बहवः शत्रवः अपि भवन्ति स्वास्यैव राज्ये अनेकाः गुप्ताचराः, चाटुकाराः, लुब्धाः ,पिशुनाः आदि विविधाः दुर्जनाः सज्जनाश्च भवन्ति अतः तेभ्यः दुर्जनेभ्यः स्वरक्षा कथं करणीया कथञ्च न्यायः कर्तव्यः तद् सर्वमपि शुक्रनीतिः सम्यक् प्रतिपादयति —

**सर्वस्मादधिको दाता शूरस्त्वं धार्मिको ह्त्रासिं ।**
**इति वाचं न श्रृणुयाच्द्रावका वंचकास्तु ते ।।** [14]
**रागाल्लोभाद्भयाद्राज्ञः स्युर्मका इव मन्त्रिणः।**
**न ताननुग्रतान्विद्यान्नृपतिः स्वार्थसिद्धये ।।** [15]
**पृथक्पृथङ्मतं तेषां लेखयित्वा ससाधनम्।**
**विमृशेत्स्वमतेनैव यत्कुर्याद्बहुसम्मतम्।।**[16]

बुद्धिमान राजा सदैव गजअश्वरथपश्वादीन् च येऽपि कार्ययोग्याः भवेयुः तान् योजयते येऽपि च निष्क्रियाः स्युः तान् परित्यजेत्—

**International Journal of Research in Social Sciences**
Vol. 9 Issue 3, March 2019,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**गजाश्वरथपश्वादीन्  भृत्यान्दासांस्तथैव च ।**
**संभारान्सैनिकान् कार्यक्षमान्ज्ञात्वा दिनेदिन ।।**
**सरक्षयेत्प्रयत्नेन सुजीर्जान् संत्यजेत्सुधीः ।**[17]

शुक्रनीति शिक्षयति यत् राज्ञा सुरक्षायां कीदृशः गणः योजनीयः    ।  तत्रोक्तमस्ति— पृष्ठाग्रगान् क्रुरवेषान्नतिनीति विशारदान् ।

**सिद्धास्त्रनग्नशस्त्रांश्च भरानारान्नियोजयेत्।।**[18]

शुक्रनीत्याम् सम्यक् प्रतिपादितमस्ति यत् राज्ञा राजधान्यां निर्वासं कुर्वन् नित्यं स्व कार्यान् सम्पादयेत् । सः  राजा  अन्तिमप्रहरद्वयं मध्ये यदा  रात्रेः घटी द्वयं  अवशिष्ट भवेत् उत्थाय पश्येत् यत् राज्ञः आयव्ययः कीयान् अस्ति , कोष ,धनम् कीया  न् भागः  अवशिष्टः वर्तते अर्थात् कोषाधिकारिणः सः दैनिक गोष्ठी कुर्यात्। इत्येवं शुक्रनीत्यां राजधर्मविषये राज्ञः अङ्गानां विषये कर्तव्याकर्तव्ये दैनिकं वार्षिकं च कर्तव्यं सर्वं सुप्रतिपादितमस्ति।

---

**सन्दर्भाः -**

[1] शु.नी.  -1 /5

[2] मनु07/6

[3] महा.शान्ति 56/125

[4] रघुवंश 4/12

[5] शुक्रनीतिः - 1 /22 "आचारप्रेरको राजा"

[6] शुक्रनीतिः – 1/23 "राजदण्डभयाल्लोकः स्वधर्मपरो भवेत्"

[7] यो हि स्वधर्मनिरतः प्रजानां परिपालकः। यष्टा च सर्वयज्ञानां नेता शत्रुगणस्य च।  दानशौण्डः क्षमी शूरो निःस्पृहो विषयेष्वपि। विरक्तः सात्विकः स हि नृपोऽन्ते मोक्षमन्वियात्।। शुक्रनीतिः – 1/30-31

[8] विपरीतस्तामसः स्यात् सोऽन्ते नरकभाजनः। शुक्रनीतिः – 1/32

[9] राजसो दाम्भिको लोभी विषयी वंचकश्शठः। मनसाऽन्यश्च वचसा कर्मणा कलहप्रियः। शुक्रनीतिः – 1/33-34

[10] शुक्रनीतिः – 1/77

[11] शुक्रनीतिः 5-49-51

[12] शुक्रनीतिः 5-53/54

[13] शुक्रनीतिः 2-355

[14] शुक्रनीतिः 1/364

[15] शुक्रनीतिः 365

[16] शुक्रनीतिः 366

[17] शुक्रनीतिः 367

[18] शुक्रनीतिः 379

## सन्दर्भग्रन्थसूची –


1. श्रीमहर्षिशुक्राचार्यविरचिता, व्याख्याकारः-प.श्री ब्रह्मशंकरमिश्रः,(1999), शुक्रनीतिः, चौखम्भा संस्कृत संस्थान, वाराणसी।
2. श्रीमहर्षिशुक्राचार्यविरचिता, व्याख्याकारः-स्वामी जगदीश्वरानन्दसरस्वती, (2008), शुक्रनीतिः, रामलाल कपूर ट्रस्ट रेवली, सोनीपत।
3. श्रीभोलाशंकरव्यासः, विक्रमसंवत् 2057, बृहद्संस्कृतसाहित्येतिहासः, चौखम्भा संस्कृत संस्थान , वाराणसी।
4. श्रीमहर्षिवेदव्यासविरचिता, व्याख्याकारः-स्वामी जगदीश्वरानन्दसरस्वती, (2011), चौखम्भा संस्कृत संस्थान, वाराणसी।